# ॥ श्री श्रीगणेशपञ्चरत्नस्तोत्रम् ॥

(स्वामी रूपेश्वरानन्द आश्रम द्वारा संशोधित)

श्रीगणेशाय नमः ।

मुदाकरात्तमोदकं सदाविमुक्तिसाधकं कलाधरावतंसकं विलासिलोकरञ्जकम्

अनायकैकनायकं विनाशितेभदैत्यकं नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १॥

नतेतरातिभीकरं नवोदितार्कभास्वरं नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।

सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।

कृपाकरं क्षमाकरं मुदाकरं यशस्करं नमस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।

प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं कपोलदानवारणं भजे पुराणवारणम् ॥ ४॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।

हृदन्तरे निरन्तरं वसन्तमेव योगिनां तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५॥

## ।।फलश्रुतिः ।।

महागणेशपञ्चरत्नमादरेण योऽन्वहं प्रगायति प्रभातके हृदि स्मरन् गणेश्वरम् ।

अरोगतामदोषतां सुसाहितीं सुपुत्रतां समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६॥

इति श्रीशङ्करभगवतः कृतौ श्रीगणेशपञ्चरत्नस्तोत्रं सम्पूर्णम् ॥

## सिद्धि विधान:

- **साधना आरंभ:** भाद्रपद माह के शुक्ल पक्ष की चतुर्थी तिथि अथवा किसी भी माह की चतुर्थी तिथि या किसी भी बुधवार से।
- **समय:** प्रातः सूर्योदय, दोपहर अथवा रात्रि।
- **पाठ संख्या:** 11, 21, 51, 108 अथवा यथाशक्ति)
- **दिन:** 11, 21, 41 दिन (दिन कम करने हो तो अधिक संख्या में पाठ करें)
- **भोग:** घर में बनी शुद्ध मिठाई (लड्डू) अथवा सात्विक भोजन।
- **दिशा:** प्रातः काल में पूर्व या उत्तर और रात्रि काल में पश्चिम।
- **वस्त्र:** लाल अथवा कोई भी।
- **आहार:** पूर्ण रूप से सात्विक भोजन सामान्य रहेगा इसमें लहसुन प्याज़ के सेवन से भी दूर रहना चाहिए। रात्रि भोजन का त्याग करें साधना काल में।
- **संकल्प एवम् संक्षिप पूजन:** षट्कर्म के उपरांत अपने गुरु एवं इष्ट का ध्यान करें एवं संकल्प बोलें। गणेश जी का संक्षिप्त पूजन करें धुप, दीप, पुष्प भोग आदि अर्पित करें।
- पाठ समाप्त होने पर क्षमा प्रार्थना करें।
- **पाठ संख्या:** यह स्तोत्र 1000 पाठ करने से सिद्ध होता है। विशेष सिद्धि के लिए 10000 पाठ कर सकते हैं।


**स्वामी रुपेश्वरानंद आश्रम, बलुआ , जिला - चंदौली ( उत्तर प्रदेश** )

Mobile No. : 7607 233 230 https://swamirupeshwaranand.in/